# अत्युत्तमानामवरे तेजो भङ्गो न विद्यते

**पं. राघवेन्द्राचार्यः राचूरि**
**बेङ्गलूरु**

अस्ति काचित् सरस्वतीदृषद्वतीनद्योः मध्यप्रदेशे ब्रह्मावर्तं नाम पुण्यभूमिः यत्र परमपावनी सरस्वती ऐन्द्रीं दिशमुद्दिश्य स्यन्दति। तत्र महापराक्रमी राजर्षिः पृथुः कस्मिंश्चित् शोभने मुहूर्ते शताश्वमेधसंकल्पमकरोत्। एवं यज्ञार्थं दीक्षितः सः राजा विधिवत् क्रतुशतं निर्वर्तयितुमारेभे। पृथुना क्रियमाणोऽयं यज्ञः शक्रकृतक्रतुशतापेक्षया अतिशयितां भेजे यतः स्वयं सर्वव्यापी सर्वसमर्थः सर्वलोकगुरुः साक्षात् भगवान् श्रीहरिरेव क्रतावस्मिन् यज्ञपतिर्बभूव।

परं सुराधिपः शक्रः स्वकृतक्रतुशतापेक्षया अतिशयोपेतं अभिप्रेत्य भगवद्भक्तस्य पृथोः इमं यज्ञमहोत्सवं न सेहे। अमृष्यमाणः सः यज्ञस्य प्रतिघातं चकार। पृथौ अन्त्येन अश्वमेधेन यजमाने सति स्पर्धमानः इन्द्रः तिरोहितः सन् यज्ञाश्वं अपोवाह।

पाखण्डरूपं धृत्वा यज्ञाश्वं अपहृत्य विहायसा गच्छन्तं शक्रं वीक्ष्य तत्र भगवान् अत्रिमहर्षिः "जहि यज्ञहनं तात महेन्द्रं विबुधाधिपम्" इति पृथुपुत्रं संचोदयामास। तदाकर्ण्य अतिकृद्धः पृथुसुतः सीताकृतिं अपहृत्य गच्छन्तं रावणं गृध्रराडिव अन्वधावत्। तदा महेन्द्रः यज्ञाश्वं हित्वा स्वस्वीकृतपाखण्डरूपं विसृज्य अन्तर्हितः सन् विहायसि तस्थौ। तदा धीरः सः पृथुपुत्रः यज्ञपशुमादाय पितृयज्ञं प्रति आजगाम। तत्रोपस्थिताः परमर्षयः तस्य अद्भुतं कर्म विलक्ष्य "यस्मात् त्वं इन्द्रं पराभूय यज्ञाश्वं जितवान् तस्मात् विजिताश्वनाम्ना जगति प्रथितो भविष्यसि" इति जगदुः।

श्रीमद्भागवते चतुर्थस्कन्धे श्रूयमाणायाः अस्याः कथायाः श्रवणेन नूनं पामराणां चित्ते इन्द्रापेक्षया विजिताश्वस्य उत्तमत्त्वं, इन्द्रस्य अशक्तत्त्वं, भीरुता, युद्धे पलायनपरता इत्यादिकं भासते। परं विचारणशीलानां विदुषां चेतसि - क्व देवानां सम्राट् इन्द्रः? क्व मानवस्य पृथोः पुत्रः विजिताश्वः? किं मानवः देवानपि अतिशेरते? कथं वा शतक्रतोः पृथुपुत्रापेक्षया अवरता? किं शक्रस्यायं तेजोभङ्गः वास्तविकः भवितुं अर्हति? इति शङ्काशतं चकास्ति।

तदयं भगवान् सर्वज्ञमुनिः गरुड-स्कान्द-पुराणवचनोदाहरणेन शङ्काशतं विच्छिद्य सन्मार्गगामिनां चेतांसि विमलीचकार। तदित्थम् -

**देवा शक्तास्तु मोहाय दर्शयेयुरशक्तवत् ।**
**ऋषीणां चैव राज्ञां च न हि ते देवतासमाः ।।**
**आज्ञया वा हरेः क्वापि ।**
**कार्यतो वा क्वचित् क्वचित् ।। इति गारुडे । भा.ता ४.१९.१७**

यद्यपि इन्द्रादयः देवाः ऋषीणां राज्ञां च अपेक्षया सामर्थ्ये उत्तमाः तथाऽपि अज्ञजनानां मोहाय असमर्थाः इव प्रदर्शयेयुः। क्वचित् श्रीहरेः आज्ञया, कार्यसाधनार्थं वा।

अनेन उदाहृतपुराणवचनेन शक्रस्य पृथुपुत्रापेक्षया उत्तमत्वं, यज्ञपश्वपहरणस्य कारणं च विज्ञायते। हर्याज्ञापालनार्थं, देवताकार्यसाधनार्थं किल इन्द्रेण प्रवृत्तम्। शतक्रतुत्वे इन्द्रस्यैव अधिकारः स्यात् न तु अन्यस्य इति ईश्वरेच्छायाः सद्भावात्। पृथोः क्रतुशतार्थं यतमानस्यापि तादृशी योग्यता नासीत्। स्वयोग्यतापेक्षया अधिकसाधनार्थं प्रयत्नः अपि अधर्मः एव। अयोग्यकर्मणां फलं दैत्याः अपहरन्ति। योग्यतातिक्रमेण कृतस्य कर्मणः फलं यज्ञपशुसमम्। तत् पाखण्डिभिः अपह्रियते। एतत् ज्ञापयितुमेव इन्द्रः पाखण्डिरूपं धृत्वा यज्ञपशुं अपाहरत्।

किंच इन्द्रस्य अनेन तेजोभङ्गः जातः इति इमां शङ्कां परिहर्तुं भगवत्पादैः स्कान्दवचनं उदाहृतम् ।

**प्रणिपातादिकं देवैः ऋष्यादिषु जनार्दने ।**
**क्रियतेऽतो न तेषां हि तेजोभङ्गः कदाचन ।।**
**अत्युत्तमानामवरे तेजोभङ्गो न विद्यते ।**
**यथा नराणां तिर्यक्षु प्रायः साम्ये हि स स्मृतः ।। इति स्कान्दे । भा.ता ४.१९.१७**

यदा देवाः स्वापेक्षया अवरान् ऋष्यादीन् प्रणमन्ति तदा तेषां अन्तर्यामिणं श्रीहरिमेव प्रणमन्ति इति कारणतः तेषां किञ्चिदपि तेजोभङ्गः न भवति। यथा हि लोके जनाः स्वापेक्षया नीचयोनिजातानां पश्वादीनां नमनेऽपि तेजोभङ्गो न भवति तथा उत्तमैः अवरान् प्रति नमनेऽपि तत्र हरिमात्रोद्देशत्वस्य सर्वैः ज्ञातुं शक्यत्वात् तेजोभङ्गस्य अवकाशः नास्ति। प्रायः समानां यदा नमस्कारः तदा एव तेजोभङ्गस्य प्रसक्तिः। तदपि द्वेषादिसद्भावे एव। द्वेषाभावे तु समानामपि परस्परनमनादिकं तेजोभङ्गकारणं न भवति इति ज्ञातव्यम्।

उत्तमानां विषये नीचताचिन्ता महते अनर्थाय भवति। अतः अत्युत्तमानामवरे तेजोभङ्गो न विद्यते इति प्रमाणवचनानुसारेण शक्रस्य तेजोभङ्गो सद्भिः न शङ्कनीयः।

**।। श्रीकृष्णार्पणमस्तु ।।**